काशोऽस्ति वाक्समूहमनुसर्त्तुम्। प्रत्येकमपि दष्टलक्षणेऽभिहिते सर्व्वत्र त्रैविध्यं भवति। तस्मात्त्रैविध्यमेव वक्ष्यामः। एतद्ध्यातुरहितमसम्मोहकरञ्च। अपि चात्रैव सर्व्वसर्पव्यञ्जनावबोधः।

तत्र दर्व्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदनाकटीपृष्ठग्रीवादौर्व्वल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जड़ता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्द्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति।

मण्डलिविषेण त्वगादीनां पीतत्वं शीताभिलाषः परिधूपनं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्द्ध्वमधश्च मांसानामवशातनं श्वयथुर्द्दंशकोथः पीतरूपदर्शनमाशुकोपस्तास्ताश्च पित्तवेदना भवन्ति।

राजिमद्विषेण शुक्लत्वं त्वगादीनां शीतज्वरो रोमहर्षस्तब्धत्वं गात्राणामादंशशोफः सान्द्रकफप्रसेकश्छर्द्दिरभीक्ष्णमक्ष्णोः कण्डूः कण्ठे श्वयथुर्घुर्घुरक उच्छ्वासनिरोधस्तमःप्रवेशस्तास्ताश्च कफवेदना भवन्ति।

पुरुषाभिदष्ट ऊर्द्ध्वं प्रेक्षतेऽधस्तात् स्त्रिया सिराश्चोत्तिष्ठन्ति ललाटे। नपुंसकाभिदष्टस्तिर्य्यक्प्रेक्षी भवति। गर्भिण्या पाण्डुमुखोऽध्मातश्च। सूतिकया शूलार्त्तो रुधिरं मेहत्युपजिह्विका चास्य भवति। ग्रासार्थिनान्नं काङ्क्षति। वृद्धेन मन्दा वेगाश्च। बालेनाशु मृदवश्च निर्व्विषेणाविषलिङ्गम्। अन्धाहिकेनान्धत्वमित्येके। ग्रसनादजगरः शरीरप्राणहरो न विषात्। तत्र सद्यःप्राणहराहिदष्टः पतति शस्त्राशनिहत इव भूमौ स्रस्ताङ्गः स्वपिति।

तत्र सर्व्वेषां सर्पाणां विषस्य सप्त वेगा भवन्ति तत्र दर्व्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति तत् प्रदुष्टं कृष्णतामुपैति तेन कार्ष्ण्यं पिपीलिकापरिसर्पणमिव चाङ्गे भवति। द्वितीये मांसं दूषयति तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति। तृतीये मेदो दूषयति तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणञ्च। चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति। तेन तन्द्राप्रसेकसन्धिविश्लेषा भवन्ति। पञ्चमेऽस्थीन्यनुप्रविशति प्राणमग्निञ्च दूषयति तेन पर्व्वभेदो हिक्का दाहश्च भवति। षष्ठे मज्जानमनुप्रविशति ग्रहणीञ्चात्यर्थं दूषयति तेन गात्राणां गौरवमतीसारो हृत्पीड़ा मूर्च्छा च भवति। सप्तमे शुक्रमनुप्रविशति व्यानञ्चात्यर्थं कोपयति कफञ्च सूक्ष्मस्रोतोभ्यः प्रच्यावयति तेन श्लेष्मवर्त्तिप्रादुर्भावः कटीपृष्ठभङ्गः सर्व्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति।

तत्र मण्डलिनां प्रथमे वेगे विषं शोणितं दूषयति तत्तत्प्रदुष्टं पीततामुपैति तत्र परिदाहः पीतावभासता चाङ्गानां भवति। द्वितीये मांसं दूषयति तेनात्यर्थं पीततापरिदाहौ दंशे श्वयथुश्च भवति। तृतीये मेदो दूषयति तेन पूर्व्ववच्चक्षुर्ग्रहणं तृष्णा दंशे क्लेदः स्वेदश्च। चतुर्थे कोष्ठमनुप्रविश्य ज्वरमापादयति पञ्चमे परिदाहं सर्व्वगात्रेषु करोति। षष्ठसप्तमयो पूर्व्ववत्।

राजिमतां प्रथमे वेगे विषं शोणितं दूषयति तत्प्रदुष्टं पाण्डुतामुपैति तेन रोमहर्षः शुक्लावभासश्च पुरुषो भवति। द्वितीये मांसं दूषयति तेन पाण्डुतात्यर्थं जाड्यं शिरःशोफश्च भवति। तृतीये मेदो दूषयति तेन चक्षुर्ग्रहणं स्वेदो घ्राणाक्षिस्रावश्च भवति। चतुर्थे कोष्ठमनुप्रविश्य मन्यास्तम्भं शिरोगौरवं चापादयति। पञ्चमे वाक्सङ्गं शीतज्वरञ्च करोति षष्ठसप्तमयोः पूर्व्ववदिति।

भवन्ति चात्र। धात्वन्तरेषु याः सप्त कलाः संपरिकीर्त्तिताः। तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम्। येनान्तरेण हि कलां कालकल्पं भिनत्ति हि। समीरणेनोह्यमानं तत्तु वेगान्तरं स्मृतम्। शूनाङ्गः प्रथमे वेगे पशुर्ध्यायति दुःखितः। लालास्रावो द्वितीये तु कृष्णाङ्गः पीड्यते हृदि। तृतीये च शिरो दुःखं कण्ठग्रीवञ्च तप्यते। चतुर्थे वेपते मूढ़ः खादन् दन्तान् जहात्यसून्। केचिद्वेगत्रयं प्राहुरन्त्यमेतेषु तद्विदः। ध्यायति प्रथमे वेगे पक्षी मुह्यत्यतः परम्। द्वितीये विह्वलः प्रोक्तस्तृतीये मृत्युमृच्छति। केचिदेकं विहङ्गेषु विषवेगमुशन्ति हि। मार्ज्जारनकुलादीनां विषं नातिप्रवर्त्तते"। "अथातः सर्पदष्टचिकित्सितकल्पं व्याख्यास्यामः। सर्व्वैरेवादितः सर्पैः शाखादष्टस्य देहिनः। दंशस्योपरि बध्नीयादरिष्टा(तागा)चतुरङ्गुले। प्लोतचर्म्मान्तवल्कानां मृदुनाऽन्यतमेन च। न गच्छति विषं देहमरिष्टाभिर्निवारितम्। दहेद्दंशमथोत्कृत्य यत्र बन्धो न जायते। आचूषच्छेददाहाः सर्व्वत्रैव तु पूजिताः। प्रतिपूर्य्य मुखं वस्त्रैर्हितमाचूषणं भवेत्। स दष्टव्योऽथ वा सर्पो लोष्टो वापि हि तत्क्षणात्। अथ मण्डलिना दष्टं न कथञ्चन दाहयेत्। स पित्तविषबाहुल्याद्दंशो दाहाद्विसर्पति। अरिष्टामपि